"वभौ स भिन्दन् ह्रदतस्तरङ्गान्
वार्य्यर्गलाभङ्ग इव प्रवृत्तः ॥")
कलसी । इति धरणिः ॥
वारीटः, पुं, ( वार्य्यां गजबन्धनभूम्यामेटतीति । इट्+कः । ) हस्ती । इति शब्दमाला ॥
वारीशः, पुं, ( वारीणामीशः । ) समुद्रः । इति हेमचन्द्रः । ४ । १३८ ॥
वारुः, पुं, ( वारयति रिपूनिति । वृ+णिच्+बाहुलकात् उण् । ) विजयकुञ्जरः । इति हारावली । १६० ॥
वारुटः, पुं, खट्टिः । अन्त्यशय्या । इति त्रिकाण्डशेषः ॥
वारुणं, क्ली, ( वरुणो देवतास्येति । वरुण+अण् । ) जलम् । इति राजनिर्घण्टः ॥ ( शतभिषानक्षत्रम् । यथा, तिथितत्त्वे ।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १५ ।
"वारुणं कालिकाख्यञ्च शाम्बं नन्दिकृतं
शुभम् ।
सौरं पाराशरप्रोक्तमादित्यं चातिविस्तरम् ॥"
पुं, भारतस्य खण्डविशेषः । यथा, विष्णुपुराणे । २ । ३ । ६ ।
"इन्द्रद्वीपस्तथा सौम्यो गान्धर्व्वस्तथ वारुणः ॥")
वरुणसम्बन्धिनि, त्रि । यथा,—
"पश्चिमे पुष्पदन्तश्च वारुणश्च प्रशस्यते ।
उत्तरेण तु भल्लाटं सौम्यञ्च शुभदं भवेत् ॥
उडुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः ।
प्लक्षश्चोत्तरतो धन्यो विपरीतास्त्वसिद्धये ॥"
इति मात्स्ये २२८ अध्यायः ॥
( यथा च महाभारते । ३ । १०२ । १ ।
"समुद्रं ते समाश्रित्य वारुणं निधिमम्भसाम् ।
कालेयाः संप्रवर्त्तन्ते त्रैलोक्यस्य विनाशने ॥")
वारुणकर्म्म, क्ली, ( वारुणं जलसम्बन्धि कर्म्म । ) जलाशयखननादि । तस्य शुभाशुभकालादि यथा,—
यम उवाच ।
"सुदिने शुभनक्षत्रे चन्द्रताराबलैर्युते ।
सहतुस्तु भवेद्यत्र काले तस्मिन् विधिः स्मृतः ॥
सहतां तु कृतं कर्त्तुः संपूर्णस्तन्मनोरथः ।
कर्कटे पुत्त्रलाभस्तु सौख्यं तु मकरे भवेत् ॥
मीने यशोऽर्थलाभस्तु कुम्भे च सुबहूदकम् ।
वृषे च मिथुने वृद्धिर्वृश्चिके निर्म्मलं भवेत् ॥
पितृत्वप्रिस्तु कन्यायां तुलायां सत्यसङ्गतिः ।
सिंहे मेषे धनं नाशं जलस्य कुरुते द्विज ।
तथा चैतेषु लग्नेषु वारुणं कर्म्म नो दिशेत् ॥"
इति वह्निपुराणे वारुणारामप्रतिष्ठानामाध्यायः ॥
वारुणिः, पुं, ( वरुणस्यापत्यं पुमान् । वरुण+इञ् । ) अगस्त्यमुनिः । इति त्रिकाण्डशेषः ॥ ( यथा, महाभारते । ३ । १०५ । १ ।
"समुद्रं स समासाद्य वारुणिर्भगवानृषिः ।
उवाच सहितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरुणालयम् ॥"
वशिष्ठः । यथा, महाभारते । १ । ९९ । ७ ।
"स वारुणिस्तपस्तेपे तस्मिन् भरतसत्तम ! ।
वने पुण्यकृतां श्रेष्ठः स्वादुमूलफलोदके ॥"
विनतापुत्त्रभेदः । यथा, महाभारते ।१।६५।४० ।
"तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ ।
आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्त्तिताः ॥"
भृगुः । यथा, शतपथब्राह्मणे । ११ । ६ । १ ।
"भृगुर्ह वै वारुणिः । वरुणं पितरं विद्ययातिमेने । तद्ध वरुणो विदाञ्चकार ॥" )
वारुणी, स्त्री, ( वरुणस्येयम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् । ङीप् । ) सुरा । ( यथा, मनौ । ११ । १४७ ।
"अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति ।
मतिपूर्व्वमनिर्द्देश्यं प्राणान्तिकमिति स्थितिः ॥"
मदिराधिष्ठात्री देवी । यथा, विष्णुपुराणे । १ । ९ । ९३ ।
"किमेतदिति सिद्धानां दिवि चिन्तयतां ततः ।
बभूव वारुणी देवी मदाघूर्णितलोचना ॥"
"वारुणी मदिराधिष्ठात्री देवी ।" इति तट्टीकायां श्रीधरस्वामी ॥ वरुणपत्नी । वारुणीवल्लभशब्ददर्शनात् ॥ यथा, महाभारते । २ । ९ । ६ ।
"यस्यामास्ते स वरुणो वारुण्या च समन्वितः ।
दिव्यरत्नाम्बरधरो दिव्याभरणभूषितः ॥"
नदीविशेषः । यथा, गो० रामायणे ।२।७०।१२ ।
"पूर्व्वेण वारुणीं तीर्त्वा कुरुक्षेत्रे सरस्वतीम् ।
सरांसि च प्रफुल्लानि नदीश्च विमलोदकाः ॥")
पश्चिमदिक् । इत्यमरः । १ । ३ । ५१ ॥ (यथा, नैषधचरिते । ४ । ६० ।
"यद विधुन्तुदमालि मदीरितै-
स्त्यजसि किं द्विजराजधिया विधुम् ।
किमु दिवं पुनरेति यदीदृशः
पतित एष निषेव्य हि वारुणीम् ॥"
विद्याविशेषः । यथा, तैत्तिरीयोपनिषदि । ३ तृतीयवल्ल्याम् ६ षष्ठानुवाके । "आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति । सैषा भार्गवी वारुणी विद्या ॥"
अश्वानां छायाविशेषः । यथा, अश्ववैद्यके । ३ । १७३ ।
"शुद्धस्फटिकसङ्काशा सुस्निग्धा चैव वारुणी ॥")
शतभिषानक्षत्रम् । इति हेमचन्द्रः ॥ गण्डदूर्व्वा । इति मेदिनी । णे, ६८ ॥ इन्द्रवारुणी । दूर्व्वा । इति राजनिर्घण्टः ॥ शतभिषानक्षत्रयुक्तचैत्रकृष्णत्रयोदशी । यथा, स्कन्दपुराणे ।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
वारुणं शतभिषा ।
"शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ॥
शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥
अत्र संज्ञाविधेः सार्थकत्वाय निमित्तत्वेन मासपक्षतिथ्युल्लेखानन्तरं महावारुणीमहामहावारुण्यायुल्लेखनीये । तेन चैत्रे मासि कृष्णपक्षे त्रयोदश्यां तिथौ महावारुण्यां महामहावारुण्यां यथायथं प्रयोज्यम् । न चात्र ।
"स्नानं कुर्व्वन्ति या नार्य्यश्चन्द्रे शतभिषां गते ।
सप्तजन्म भवेयुस्ता दुर्भगा विधवा ध्रुवम् ॥"
इति ॥
"त्रयोदश्यां तृतीयायां दशम्याञ्च विशेषतः ।
शूद्रविट्क्षत्त्रियाः स्नानं नाचरेयुः कथञ्चन ॥"
इति प्रचेतोजाबालिवचनाभ्यां स्त्रीणां शूद्रादीनाञ्च स्नाननिषेध इति वाच्यम् ।
"भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः ।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु ॥"
इति हेमाद्रिधृतवचनेन रागप्राप्तस्नान एव निषेधात् नक्षत्रेऽपि तथा कल्पनात् । अत्र त्रयोदश्यां पूर्णायां पूर्व्वाह्णेतरकाले नक्षत्रादिसत्त्वे परदिने पूर्व्वाह्णे तिथिनक्षत्रलाभेऽपि पूर्व्वदिन एव स्नानम् । रात्रावपि वारुण्यादिषु गङ्गायां स्नानम् ।
"दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः ।
स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ॥"
इति ब्रह्माण्डपुराणे सामान्यतः प्रतिप्रसवात् । इति तिथ्यादितत्त्वम् ॥ * ॥ वरुणप्रेरितवृन्दावनस्थकदम्बतरुकोटरनिःसृतबलदेवपीतवारुणी । यथा,—
पराशर उवाच ।
"वने विचरतस्तस्य सह गोपैर्महात्मनः ।
मानुषच्छद्मरूपस्य शेषस्य धरणीभृतः ॥
निष्पादितोरुकार्य्यस्य कार्य्येणोर्व्वीविचारिणः ।
उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम् ॥
अभीष्टा सर्व्वदा यस्य मदिरे त्वं महौजसः ।
अनन्तस्योपभोगाय तस्य गच्छ मुदे शुभे ॥
इत्युक्ता वारुणी तेन सन्निधानमथाकरोत् ।
वृन्दावनवनोत्पन्नकदम्बतरुकोटरे ॥
विचरन् बलदेवोऽपि मदिरागन्धमुत्तमम् ।
आघ्राय मदिरातर्षमवापाथ पुरातनम् ॥
ततः कदम्बात् सहसा मद्यधारां स लाङ्गली ।
पतन्तीं वीक्ष्य मैत्रेय प्रययौ परमां मुदम् ॥
पपौ च गोपगोपीभिः समवेतो मुदान्वितः ।
उपगीयमानो ललितं गीतवाद्यविशारदैः ॥"
इति विष्णुपुराणे ५ अंशे २५ अध्यायः ॥
वारुणीवल्लभः, पुं, ( वारुण्या वल्लभः । वारुणीवल्लभा यस्येति वा ।) वरुणः । इति शब्दमाला ॥
वारुण्डः, पुं, फणिनां राजा । इति मेदिनी । डे, ३३ ॥ तन्मते पवर्गीयादिः । किन्तु वृधातोः उण्डप्रत्ययनिष्पन्नत्वात् अन्तःस्थादौ लिखितः ॥
वारुण्डः, पुं क्ली, ( वृ+उण्डः । ) नौसेकपात्रम् । नेत्रमलम् । कर्णमलम् । इति मेदिनी । ते, ३३ ॥